श्री नारायणाष्टकं

श्री नारायणाष्टकं

वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणा-
-दौदार्यादघशोषणादगणितश्रेयः पदप्रापणात् |
सेव्यः श्रीपतिरेक एव जगतामेतेऽभवत्साक्षिणः
प्रह्लादश्च विभीषणश्च करिराट् पांचाल्यहल्याध्रुवः || 1 ||

प्रह्लादास्ति यदीश्वरो वद हरिः सर्वत्र मे दर्शय
स्तंभे चैवमिति ब्रुवंतमसुरं तत्राविरासीद्धरिः |
वक्षस्तस्य विदारयन्निजनखैर्वात्सल्यमापादय-
-नार्तत्राणपरायणः स भगवान्नारायणो मे गतिः || 2 ||

श्रीरामोऽत्र विभीषणोऽयमनघो रक्षोभयादागतः
सुग्रीवानय पालयैनमधुना पौलस्त्यमेवागतं |
इत्युक्त्वाऽभयमस्य सर्वविदितं यो राघवो दत्तवान्
आर्तत्राणपरायणः स भगवान्नारायणो मे गतिः || 3 ||

नक्रग्रस्तपदं समुद्धृतकरं ब्रह्मादयो भोः सुरा
रक्षंतामिति दीनवाक्यकरिणं देवेष्वशक्तेषु यः |
मा भैषीरिति तस्य नक्रहनने चक्रायुधः श्रीधरो
ह्यार्तत्राणपरायणः स भगवान्नारायणो मे गतिः || 4 ||

भो कृष्णाच्युत भो कृपालय हरे भो पांडवानां सखे
क्वासि क्वासि सुयोधनाद्यपहृतां भो रक्ष मामातुरां |
इत्युक्तोऽक्षयवस्त्रसंभृततनुर्योऽपालयद्द्रौपदीं
आर्तत्राणपरायणः स भगवान्नारायणो मे गतिः || 5 ||

यत्पादाब्जनखोदकं त्रिजगतां पापौघविध्वंसनं
यन्नामामृतपूरकं च पिबतां संसारसंतारकं |
पाषाणोऽपि यदंघ्रिपद्मरजसा शापान्मुनेर्मोचितो
ह्यार्तत्राणपरायणः स भगवान्नारायणो मे गतिः || 6 ||

पित्रा भ्रातरमुत्तमासनगतं ह्यौत्तानपादिर्ध्रुवो
दृष्ट्वा तत्सममारुरुक्षुरधिकं मात्राऽवमानं गतः |
यं गत्वा शरणं यदाप तपसा हेमाद्रिसिंहासनं
ह्यार्तत्राणपरायणः स भगवान्नारायणो मे गतिः || 7 ||

आर्ता विषण्णाः शिथिलाश्च भीता
घोरेषु च व्याधिषु वर्तमानाः |
संकीर्त्य नारायणशब्दमात्रं
विमुक्तदुःखाः सुखिनो भवंति || 8

इति श्री कूरेशस्वामि कृत श्री नारायणाष्टकं |